March – 2008

Reg. No. : ..................................

Name : ......................................

# G-3045

Part-III

## SANSKRIT SAHITYA

Maximum : 80 Scores

Time : 2 ½ Hours

Cool-off time : 15 Minutes

***General Instructions to candidates :***

- There is a 'cool-off time' of 15 minutes in addition to the writing time of 2 ½ hrs.
- You are not allowed to write your answers nor to discuss anything with others during the 'cool-off time'.
- Use the 'cool-off time' to get familiar with questions and to plan your answers.
- Read questions carefully before answering.
- All questions are compulsory and only internal choice is allowed.
- When you select a question, all the sub-questions must be answered from the same question itself.

**നിർദ്ദേശങ്ങൾ** :

- നിർദ്ദിഷ്ട സമയത്തിന് പുറമെ 15 മിനിറ്റ് 'കൂൾ ഓഫ് ടൈം' ഉണ്ടായിരിക്കും. ഈ സമയത്ത് ചോദ്യങ്ങൾക്ക് ഉത്തരം എഴുതാനോ, മറ്റുള്ളവരുമായി ആശയ വിനിമയം നടത്താനോ പാടില്ല.
- ഉത്തരങ്ങൾ എഴുതുന്നതിന് മുമ്പ് ചോദ്യങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിക്കണം.
- എല്ലാ ചോദ്യങ്ങൾക്കും ഉത്തരം എഴുതണം.
- ഒരു ചോദ്യനമ്പർ ഉത്തരമെഴുതാൻ തെരഞ്ഞെടുത്തു കഴിഞ്ഞാൽ ഉപചോദ്യങ്ങളും അതേ ചോദ്യനമ്പരിൽ നിന്ന് തന്നെ തെരഞ്ഞെടു-ക്കേണ്ടതാണ്.

1. श्लोकांशं सम्यक् पठत । रेखाङ्कितानां पदानां सन्धिच्छेदं लिखत । **1 × 2 = 2**

मदोत्कटा हैमवता <u>गजास्ते</u>

विनापि <u>यत्नादुपतस्थुरेनम्</u> ।

2. श्लोकं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि लिखत । $1 \times 4 = 4$

पितुर्नियोगादहमागतो वनं
न वत्स दर्पान्नभयान्न विभ्रमात् ।
कुलं च नः सत्यधनं ब्रवीमि ते
कथं भवान् नीचपथे प्रवर्तते ।।

(क) कस्य वचनमिदम् ?
(ख) कस्मात् वनम् आगतः ?
(ग) कुलं कीदृशम् ?
(घ) 'कथं भवान् नीचपथे प्रवर्तते ?' केन कं प्रति एषः प्रश्नः कृतः ?

3. अधः प्रदत्तयोः द्वयोः टिप्पणीं लिखत । $3 \times 2 = 6$

सूत्रधारः, नान्दी, आत्मगतम् ।

4. व्याख्यात । 3

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ।।

**अथवा**

यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ।।

5. श्लोकांशं पठित्वा तत्र सूचितां कथां स्ववाक्यैः विवृणुत । 6

"त्रीन् दोषान् कोऽभिधास्यति ।"

6. प्रदत्तानि वृत्तलक्षणानि पठित्वा श्लोके किं घटते इति प्रदर्शयत । 3

लक्षणानि –

उक्ता वसन्ततिलका तभजा जगौ गः ।
न न म य य युतेयं मालिनी भोगिलोकैः ।
द्रुतविलम्बितमाह नभौ भरौ ।

श्लोकः –

वनगमननिवृत्तिः पार्थिवस्यैवताव –
न्मम पितृपरवत्ता बालभावः स एव ।
नवनृपतिविमर्शे नास्ति शङ्का प्रजाना –
मथ च न परिभोगैर्वञ्चिता भ्रातरो मे ।।

7. श्लोकं पठित्वा आकाङ्क्षाप्रश्नानाम् उत्तराणि लिखत । $1 \times 4 = 4$

बभार राज्यं स हि पुत्रहेतोः
पुत्रं कुलार्थं यशसे कुलं तु ।
स्वर्गाय शब्दं दिवमात्महेतो –
र्धर्मार्थमात्मस्थितिमाचकाङ्क्षे ।।

(क) राजा कस्य हेतोः राज्यं बभार ?
(ख) कुलं किमर्थम् आचकाङ्क्षे ?
(ग) स्वर्गाय किम् आचकाङ्क्षे ?
(घ) किमर्थम् आत्मस्थितिम् आचकाङ्क्षे ?

8. 'क' विभागे प्रदत्तान् आशयान् 'ख' विभागे प्रदत्तै: श्लोकांशै: सह योजयत । $1 \times 4 = 4$

| क | | | ख |
|---|---|---|---|
| क. | पापं नष्टम् अभवत् । | – | 'धर्माय काचिन्न चकार हिंसाम्' । |
| ख. | वायुना प्रेरित: अग्नि: इव । | – | 'जज्वाल धर्म:' । |
| ग. | कोऽपि धर्मलाभार्थं हननादिक्रूरकर्म न अकरोत् । | – | 'प्रणनाश पाप्मा' । |
| घ. | इन्द्राण्या साकं इन्द्र: इव अभिरेमे । | – | 'शच्या सहस्राक्ष इवाभिरेमे' । |
| | | – | 'समीरितो वह्निरिवानिलेन' । |

9. श्लोकं पठित्वा सूचनानुसारम् आस्वादनटीकां रचयत । 3

आजन्मनो जन्मजरान्तकस्य
तस्यात्मजस्यात्मजित: स राजा ।
अहन्यहन्यर्थगजाश्वमित्रै –
र्वृद्धिं ययौ सिन्धुरिवाम्बुवेगै: ।।

(सूचना :– आशय:, अलङ्कारचारुता, पदप्रयोगचारुता)

10. सूचनानुसारं भरतस्य स्वभावं निरूपयत । 6

(सूचना : – भ्रातृभक्ति:, त्याग:, कोप: – शमनम्, धर्मनिष्ठा)

11. ईश्वरस्य तेज: कुत्र कुत्र वर्तते, कथं प्रवर्तते इति भगवद् गीतानुसारेण विवृणुत । 4

12. अध: प्रदत्तं नाटकांशं प्रादेशिकभाषायामनुवदत । 4

भरत: – अम्ब अनपराद्धोऽहमभिवादये ।
कौसल्या – जात नि:सन्तापो भव ।
सुमन्त: – इयं तत्र भवतो लक्ष्मणस्य जननी देवी सुमित्रा ।
भरत: – अम्ब लक्ष्मणेनातिसन्धितोऽहम् अभिवादये ।

13. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत । 5

न चाजिहीर्षीद् बलिमप्रमत्तं
न चाचिकीर्षीत् परवस्त्वभिध्याम् ।
न चाविवक्षीद् द्विषतामधर्मं
न चाविवक्षीत् हृदयेन मन्युम् ।।

(क) च + अजिहीर्षीत् = चाजिहीर्षीत् – समानसन्धियुक्तं पदद्वयं श्लोकाद्विविच्य लिखत ।
(ख) श्लोके विद्यमानमेकं समस्तपदं चित्वा विग्रहवाक्यं लिखत ।
(ग) श्लोके 'अनुचितम्' इत्यर्थे प्रयुक्तं पदं चित्वा लिखत ।

14. अध: प्रदत्तेषु आलापभेदयुक्तं श्लोकं विवेचयत । आलापभेदस्य हेतुभूतान् अंशान् विशदयत । 2

तत: शरत्तोयदपाण्डुरेषु
भूमौ विमानेष्विव रञ्जितेषु ।
हर्म्येषु सर्वर्तुसुखाश्रयेषु
स्त्रीणामुदारैर्विजहार तूर्यै: ।।

वयश्च कौमारमतीत्य सम्यक्
सम्प्राप्य काले प्रतिपत्तिकर्म ।
अल्पैरहोभिर्बहुवर्षगम्या
जग्राह विद्या: स्वकुलानुरूपा ।।

शशिदिवाकरयोर्ग्रहपीडनं
गजभुजङ्गविहङ्गमबन्धनम् ।
मतिमताञ्च विलोक्य दरिद्रतां
विधिरहो बलवानिति मे मति: ।।

15. श्लोकस्य आशयानुसारेण प्रदत्ते सम्भाषणांशे रिक्तान् अंशान् पूरयत । 4

पतत्युत्थाय चोत्थाय हा हेत्युच्चैर्लपन् मुहु: ।
दिशं पश्यति तामेव यथा यातो रघूद्वह: ।।

काञ्चुकीय: – उत्थाय उत्थाय पतति ।
प्रतीहारी – क: ? किं लपन् ?
काञ्चुकीय: – ........................ लपन् ।
प्रतीहारी – इदानीं किं करोति ?
काञ्चुकीय: – ........................ ।
प्रतीहारी – काम् ?
काञ्चुकीय: – ........................ ।

16. सर्ववित् सर्वभावेन ईश्वरं भजति इति प्रतिपादनपरं कमप्येकं गीताश्लोकं लिखत । 3

17. श्लोकं पठित्वा तत्र अलङ्कार: क इति सलक्षणं प्रतिपादयत । 3

मम मातुश्च मातुश्च
मध्यस्था त्वं न शोभसे ।
गङ्गायमुनयोर्मध्ये
कुनदीव प्रवेशिता ।।

18. श्लोकांशं पठित्वा सिद्धार्थ: कथं क्रमेण ववृधे इति एकया खण्डिकया प्रतिपादयत । 6

क्रमेण सम्यग्ववृधे कुमार –
स्ताराधिप: पक्ष इवातमस्के ।।

19. श्लोकस्य गद्यक्रमं लिखत : 2

काले ततश्चारुपयोधरायां
यशोधरायां स्वयशोधरायाम् ।
शौद्धोदने राहुसपत्नवक्त्रो
जज्ञे सुतो राहुल एव नाम्ना ।।

20. रूपकालङ्कारयुक्तं कमपि श्लोकं श्लोकांशं वा लिखत । तत्र उपमानं किमिति सूचयत ? 2

21. सूचनानुसारं राज: पुत्ररक्षणं कथम् अन्येभ्य: भूमिपालेभ्य: भिन्नम् इति एकया खण्डिकया विवृणुत । 4

सूचना :– टिरक्षिषन्त: श्रियम् ।
स तु धर्मकाम: ।